# શ્રુતિગીતા ૨

shrutigItA 2

sanskritdocuments.org

March 17, 2018

# shrutigItA 2

# શ્રુતિગીતા ૨

## Sanskrit Document Information

Text title : shrutigItA 2

File name : shrutigItA2.itx

Category : giitaa, vishhnu, krishna, puShTimArgIya, gItA, vallabhaachaarya

Location : doc_giitaa

Author : vallabhAchArya

Proofread by : PSA Easwaran psawaswaran at gmail.com

Description/comments : puShTimArgIya stotraratnAkara

Latest update : February 28, 2018

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

March 17, 2018

*sanskritdocuments.org*

# શ્રુતિગીતા ૨

પ્રાકૃતાઃ શ્રુતયઃ સર્વા ભગવન્તમધોક્ષજમ્ ।
સ્તુવન્તિ દોષનાશાય તત્રાવિષ્ટો ભવેદ્યથા ॥ ૧॥

સત્યો હરિઃ સમસ્તેષુ ભ્રમભાતેષ્વપિ સ્થિરઃ ।
અતઃ સન્તઃ સમસ્તાર્થે કૃષ્ણમેવ વિજાનતે ॥ ૨॥

કથાનન્ત્યોક્તિહૃદયાઃ સાધનાનિ ન કુર્વતે ।
સાક્ષાત્તે પાદસંશ્લિષ્ટાસ્તે કિં વાચ્યા મહાશયાઃ ॥ ૩॥

કૃષ્ણ એવ સદા સેવ્યો નિર્ણીતઃ પઞ્ચધા બુધૈઃ ।
શરીરદઃ પ્રેરકશ્ચ સુખદઃ શેષસત્પદઃ ॥ ૪॥

કર્મરૂપં હરિં કેચિત્સેવન્તે યોગરૂપિણમ્ ।
તેભ્યોઽપ્યક્ષરરૂપસ્ય સેવકાઃ સમ્મતાઃ સતામ્ ॥ ૫॥

સર્વત્ર ભગવાંસ્તુત્યઃ સર્વદોષવિવર્જિતઃ ।
ક્રીડાર્થમનુકુર્વન્હિ સર્વત્રૈવ વિરાજતે ॥ ૬॥

ગુપ્તાનન્દા યતો જીવા નિરાનન્દં જગદ્યતઃ ।
પૂર્ણાનન્દો હરિસ્તસ્માજ્જીવૈઃ સેવ્યઃ સુખાર્થિભિઃ ॥ ૭॥

કૃષ્ણે હરૌ ભગવતિ પરમાનન્દસાગરઃ ।
વર્તતે નાત્ર સન્દેહઃ કથા તત્ર નિયામિકા ॥ ૮॥

અસત્સઙ્ગો ન કર્તવ્યો ભક્તિમાર્ગસ્ય બાધકઃ ।
દેહે હ્યનુગુણે કૃષ્ણે નેન્દ્રિયાણાં પ્રિયં ચરેત્ ॥ ૯॥

સર્વ એવ હરેર્ભક્તાસ્તુલ્યા યાન્મન્યતે હરિઃ ।
અતઃ કૃષ્ણો યથાત્મીયાન્મન્યતે ભજનં તથા ॥ ૧૦॥

જ્ઞાનમાર્ગો ભ્રાન્તિમૂલમતઃ કૃષ્ણં ભજેદ્બુધઃ ।
પ્રવર્તકં જ્ઞાનકાણ્ડં ચિત્તશુદ્ધ્યૈ યતો ભવેત્ ॥ ૧૧॥

ભ્રાન્તિમૂલતયા સર્વસમયાનામયુક્તિતઃ ।
ન તદ્વિરોધાત્કૃષ્ણાખ્યં પરં બ્રહ્મ ત્યજેદ્બુધઃ ॥ ૧૨॥

જીવાનાં બ્રહ્મરૂપત્વાદ્દોષા અપિ ચ માનસાઃ ।
જગચ્ચ સકલં બ્રહ્મ્ય તતો દોષઃ કથં હરૌ ॥ ૧૩॥

સર્વથા સર્વતઃ શુદ્ધા ભક્તા એવ ન ચાપરે ।
અતઃ શુદ્ધિમભીપ્સદ્ભિસ્સેવ્યા ભક્તા ન ચાપરે ॥ ૧૪॥

સુવર્ણપ્રતિમાવાસૌ સર્વાનન્દમયોઽધિરાટ્ ।
સર્વસેવ્યો નિયન્તા ચ નિર્દુષ્ટઃ સર્વથૈવ હિ ॥ ૧૫॥

સર્વભાવવિનિર્મુક્તઃ પૂર્ણઃ ક્રોડાર્થમુદ્ગતઃ ।
નિમિત્તં તં સમાશ્રિત્ય જાયન્તે જીવરાશયઃ ॥ ૧૬॥

નિયન્તા જીવસઙ્ઘસ્ય હરિસ્તેનાણવો મતાઃ ।
જીવા ન વ્યાપકાઃ ક્વાપિ ચિન્મયા જ્ઞાનિનો મતાઃ ॥ ૧૭॥

નામરૂપપ્રપઞ્ચં હિ દેવતિર્યઙ્નરાત્મકમ્ ।
કૃષ્ણાદેવ સમુદ્ભૂતં લીનં તત્રૈવ તન્મયમ્ ॥ ૧૮॥

નૃણાં દુર્ગતિમાલોક્ય યે સેવન્તે દૃઢવ્રતાઃ ।
કૃષ્ણં તદ્ભ્રુકુટિઃ કાલો ન તાન્હન્તિ કદાચન ॥ ૧૯॥

અદાન્તે મનસિ જ્ઞાનયોગાર્થં ન યતેદ્બુધઃ ।
ગુરુસેવાપરો ભૂત્વા ભક્તિમેવ સદાભ્યસેત્ ॥ ૨૦॥

સર્વલોકોપકારાર્થં કૃષ્ણેન સહિતાસ્તુ તે ।
પરિભ્રમન્તિ લોકાનાં નિસ્તારાય મહાશયાઃ ॥ ૨૧॥

પુત્રાદીન્સમ્પરિત્યજ્ય કૃષ્ણઃ સેવ્યો ન તૈઃ સહ ।
તત્સુખં ભગવાન્દાતા તે તુ ક્લિષ્ટેઽતિદુઃખદાઃ ॥ ૨૨॥

પરિભ્રમંસ્તીર્થનિષ્ઠો ગુરુલબ્ધહરિસ્મૃતિઃ ।
ન સેવેત ગૃહાન્ દુષ્ટાન્ સદ્ધર્માત્યન્તનાશકાન્ ॥ ૨૩॥

સદ્બુદ્ધ્યા સર્વથા સદ્ભિર્ન સેવ્યમખિલં જગત્ ।
ભ્રાન્ત્યા સદ્બુદ્ધિરત્રેતિ સન્તં કૃષ્ણં ભજેદ્બુધઃ ॥ ૨૪॥

ખપુષ્પાદિસમત્વાદ્ધિ મિથ્યાભૂતં જગદ્યતઃ ।
અધિષ્ઠાનાચ્ચ સદ્ભાનં તં કૃષ્ણં નિયતં ભજેત્ ॥ ૨૫॥

કાલાદિતૃણપર્યન્તા ન સેવ્યા મુક્તિમિચ્છતા ।
દોષત્યાજનશક્તો હિ સેવ્યો દાતા ગણસ્ય ચ ॥ ૨૬॥

જીવેષુ ભગવાનાત્મા સઞ્છન્નસ્તેન તત્ર ન ।
ભજનં સર્વથા કાર્યં તતોઽન્યત્રૈવ પૂજયેત્ ॥ ૨૭॥

સુખસેવાપરો યસ્તુ સદાનન્દં હરિં ભજેત્ ।
અન્યથા સુખમપ્રેપ્સુઃ સર્વથા દુઃખમાપ્નુયાત્ ॥ ૨૮॥

કૃષ્ણાનન્દઃ પરાનન્દો નાન્યાનન્દસ્તથાવિધઃ ।
વેદા અપિ ન તચ્છક્તાઃ પ્રતિપાદયિતું સ્વતઃ ॥ ૨૯॥

ઇત્યેવ શ્રુતિગીતાયાઃ સઙ્ક્ષેપેણ નિરૂપિતઃ ।
અર્થરાશિસમુદ્રો હિ યથાઙ્ગુલ્યા નિરૂપ્યતે ॥ ૩૦॥

ઇતિ શ્રીવલ્લભાચાર્યવિરચિતા શ્રુતિગીતા સમ્પૂર્ણા ।

Proofread by PSA Easwaran psaeaswaran at gmail.com

*shrutigItA 2*

pdf was typeset on March 17, 2018

Please send corrections to *sanskrit@cheerful.com*